CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P. 13.

Coll. No. 349

Title Śri Lingapurane Śivaratri Vrata

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 349. Subject: Pauranic ritual

Title: Śri Lingapurāṇe Śivarātri Vrata

Author: Ramā Śankar Scribe: —

Date of the work: — Date of the Ms.: १८९३.

Place of the work: — Place of the Ms.: —

Size: 8.6" by 5" Extent: 4 foll.

Language: Sankrit Script: Devanāgarī

Remarks: —

॥श्रीगणेशायनमः॥श्रीलिंगपुराणेउमामहेश्वरसंवादेशिवरात्रि
व्रतं॥अथोद्यापनं॥हेमाद्रौस्कांदे॥स्कंदउवाच॥व्रतौस्योद्यापनंकर्मक
थंकार्यंचमानवैः॥कोविधिःकानिद्रव्याणिकथयस्वममप्रभो॥ई
श्वरउवाच॥शृणुषण्मुखवत्वेनलोकानांहितकाम्यया॥उद्याप
नंविधिंचैवकथयामितवाग्रतः॥यथासंजायतेचित्तंभक्तिश्र
द्धासमन्वितं॥सएवव्रतकालस्ययतोनित्यंहिजीवितं॥चतुर्द
श्यांकर्त्तव्यंशिवरात्रिव्रतंशुभं॥एकभक्तंत्रयोदश्यांचतुर्द

श्यामुपोषणे॥संपाद्यसर्वसंभारान्मंडपंतत्रकारयेत्॥वस्त्रैः
पुष्पैःसमाछिन्नंपट्टवस्त्रैश्चशोभितं॥तन्मध्येलेखयेद्दिव्यंलिं
गतोभद्रमंडलं॥अथवासर्वतोभद्रंमंडपांतःप्रकल्पयेत्॥
शोभोपशोभासंयुक्तंदीपैःसर्वत्रसोज्वलं॥आचार्यंवरयेत्तत्र
ऋत्विग्भिःसहितंशुचिः॥शिवरूपाश्चतेविप्राःपूज्याश्चंदनपु १
ष्पकैः॥अनुज्ञातश्चतैर्विप्रैःशिवपूजांसमारभेत्॥रुद्रनाम्ना
नमोंतेनब्राह्मणानपिपूजयेत्॥अव्रणंसजलंकुंभंतस्योप

न

रितुविन्यसेत्॥सौवर्णंराजतंताम्रंमृन्मयंवापिकारयेत्॥कुं
भोपरिन्यसेद्देवंउमयासहितंशिवं॥सौवर्णेप्यथवारौप्येवृषभे
संस्थितंशुभं॥रत्नालंकरणैर्होमैरलंकृत्यप्रपूजयेत्॥पलेनवा
तदर्धेनतदर्द्धार्द्धेनवापुनः॥वस्त्रयुग्मेनसंवेष्ट्यबिल्वपत्रैः
प्रपूजयेत्॥उमामाहेश्वरींमूर्त्तिंपूजयेद्वृषभस्थितं॥सोमंच
सगणंचैवपूजयित्वामहेश्वरं॥होमंकुर्यात्प्रयत्नेनरौद्रमं
त्रैर्यथाविधि॥ब्राह्मणान्पूजयेत्भक्त्याभोजयेच्चचतुर्दश॥
आचार्यंचसपत्नीकंवस्त्रालंकारभूषणैः॥यज्ञोपवीतवस्त्रादि

तेभ्योदद्यात्पृथक्पृथक्॥गौसवत्सांसवस्त्रांनीनालंकारसंयुतां॥
दद्यादाचार्यवर्यायशिवोमेप्रीयतामिति॥ततःसकुंभांमूर्त्तिंच
सवस्त्रांदक्षिणान्वितां॥सर्वालंकारसहितामाचार्यायनिवेदयेत्
व्रतमेतत्कृतंयन्मेपूर्णंवापूर्णमेवच॥सर्वंसंपूर्णतांयातुप्र
सादाद्भवतांमम॥इतिसंप्रार्थ्यतान्विप्रान्प्रणम्यचपुनः
पुनः॥अजैकपादभिस्तेभ्योदद्यात्कुंभान्पृथक्पृथक्॥पुराणस्तो २
त्रपाठैश्चरात्रिशेषंनवेबुधः॥ततःप्रभातसमयेकृत्वासं
ध्यादिकाक्रिया॥पुनःपूजांप्रकुर्वीततततोमैंहोसमारभेत्॥

तिलव्रीहियवैश्चैवपायसान्नेनभक्तितः॥त्र्यंबकमितिमंत्रेण
नमःशिवायच॥गौरीमिमितिमंत्रेण॥शतमष्टोत्तरंद्वयं॥
होमंकुर्याच्चमतिमान्बिल्वपत्रैःस्तनामभिः॥अजैकपादहि
[२]र्बुध्नो[३]भवः[४]शर्वो[५]उमापतिः॥[६]रुद्रः[७]पशुपतिः[८]शंभुर्[९]वरदः[१०]शि
वई[११]श्वरः॥[१२]महादेवो[१३]हरो[१४]भीमोयनामान्येवंचतुर्दश॥पूर्णाहुतिं
ततोकृत्वाकर्मशेषंसमापयेत्॥एतैर्होमंप्रकर्त्तव्यःकुभदा
नेपितान्स्मरेत्॥भोज्यचक्षमापयेदेवमेभिर्नामपदैःपृथक्॥

प्रतिमीं कुंभसहितामाचार्याय निवेदयेत् ॥ त्रीओ प्रसीद देवेश
सर्वलोकेश्वरप्रभो ॥ तवरूपप्रदानेन मम संतु मनोरथाः ॥ य
ज्ञोपवीतवस्त्राणि दद्यात्तेभ्यो पृथक्पृथक् ॥ आचार्यं पूजयेद्भ
क्त्या वस्त्रालंकारभूषणैः ॥ गोसवत्सीं ततो दद्यात्कर्मसंपूर्तिहे
तवे ॥ अन्येभ्योपि यथाश । क्ति ब्राह्मणेभ्यो हि दद्दक्षिणां ॥ आचार्या २
य प्रदद्याच्च मूर्तीं माहेश्वरीं तथा ॥ आचार्यं पूजयेद्भक्त्या वस्त्रा
लंकारभूषणैः ॥ चतुर्दश प्रदातव्या विप्रेभ्यो जलपूरिताः ॥ कुं

भा यज्ञोपवीतानि वस्त्राणि च पृथक्पृथक् ॥ पूर्णमेव च वस्त्राणि
शय्यां सोपस्करीं तथा ॥ द्वादशैव तु गो दद्यात्परिधानादिकं तथा ॥
अथवा दक्षिणामेव प्रदद्याज्जुहुयात्तिलान् ॥ व्रतमेतत्कृतं
यन्मे पूर्णं वापूर्णमेव च ॥ सर्वं संपूर्णतां यातु प्रसादाद्भवतां मम ॥
इति संप्रार्थ्य तान्विप्रान्प्रणम्य च पुनः पुनः ॥ ततश्च स्वजनैः सा ७
र्द्धं स्वयं भुंजीत न सव्रती ॥ इति स्कंदे शिवरात्र्युद्यापनं ॥ संवत् १८
७३ मार्गशीर्ष सुद ५ वार रवौ लीखितं गप॰ रमाशंकर मयाशंकरए